# संस्कृतवार्ताः

दिनाङ्क :- 08.07.2025

प्रात: - 06:55

## प्रधानमन्त्री-ब्राज़ीलिया

प्रधानमन्त्री नरेन्द्रमोदी रियो-डी-जेनेरियो-नगरे सप्तदशे ब्रिक्स-शिखर-सम्मेलने भागग्रहणानन्तरं स्वीय-ब्रज़ीलयात्रायाः द्वितीयचरणाय ब्रासीलिया-नगरं सम्प्राप्तवान्। सः अद्य ब्राज़ीलस्य राष्ट्रपतिना लूला-दा-सिल्वा इत्यमुना सह द्विपक्षीयवार्तां करिष्यति। अवधेयास्पदमिदं यत् तौ उभयोः देशयोः मध्ये परस्पर-रणनीतिक-सहभागितां दृढीकर्तुं चर्चां करिष्यतः। वार्तायां व्यापार-रक्षा-ऊर्जा-अन्तरिक्ष-प्रौद्योगिकी- कृषि-स्वास्थ्यादि विषयान् समेत्य जनेषु परस्परसम्पर्क-समेधनार्थमपि चर्चा भविष्यति। सोशल-मीडियासन्देशे प्रधानमन्त्रिणा मोदिना प्रोक्तं यत् तस्य ब्रज़ीलयात्रायाः रियो-चरणं सार्थकतया सुसम्पन्नम्। श्रीमोदिना प्रोक्तं यत् ब्रिक्स-शिखर-सम्मेलने तेन व्यापक- विचार-विमर्शः विहितः। तेन अस्य मञ्चस्य इतोऽपि प्रभावीकरणाय ब्रजीलस्य राष्ट्रपतेः प्रशंसा कृता। तेनोदीरितं यत् विश्वनेतृभिस्सह तस्य द्विपक्षीयोपवेशनं विभिन्नदेशैः सह भारतस्य मैत्रीं समेधिष्यते।

## प्रधानमन्त्री-ब्रिक्सपर्यावरणम्

प्रधानमन्त्रिणा नरेन्द्रमोदिना रियो डी जेनेरियो नगरे ब्रिक्स्-शिखरसम्मेलनस्य द्वितीयदिने आयोजिते सत्रे भागं गृहीतम्। प्रधानमन्त्रिणा तत्र विज्ञापितं यत् भारतीयाः वंशपरम्परया एव प्रकृतौ श्रद्धां स्थापयन्ति। श्रीमोदिना प्रोक्तं यत् भारतस्य कृते जलवायुन्यायः विकल्पः नास्ति, अपितु नैतिककर्त्तव्यः वर्तते। तेन सबलं प्रोक्तं यत् भारतस्य अध्यक्षतायां ब्रिक्स्-संघस्य दक्षिण-दक्षिण-सहकारस्य समेधनार्थं पुनः परिभाषा करिष्यते। प्रधानमन्त्रिणा पर्यावरणसम्बद्ध-कार्याचरणाय भारतस्य दृढप्रतिबद्धता व्यक्तीकृता। प्रधानमन्त्रिणा महत्त्वपूर्ण-खनिजप्रविधि- क्षेत्रयोः अधिकसहयोगस्यापि आग्रहो कृतः। शिखरसम्मेलनावधौ प्रधानमन्त्रिणा बोलीविया-देशस्य राष्ट्रपतिना लुइस-एर्से-कैटाकोरा सहैव उरुग्वे-देशस्य राष्ट्रपतिना यामांडू-ओर्सियन इत्येताभ्यां सह द्विपक्षीयोपवेशनं समाचरितम्। ब्रिक्स्संघेन सामाजिक-निर्धारित-रोगाणाम् उन्मूलनाय नवीन-सहकारस्य आरम्भोऽपि करिष्यते। अतः परं प्रधानमन्त्री ब्रसील्-देशस्य

राजधानीं ब्रासीलियानगरं प्रति प्रस्थितः। विगतेषु सप्तपञ्चाशत्वर्षेषु भारतीयप्रधानमन्त्रिणः एषा प्रथमा यात्रा वर्तते। ब्रज़ीलनगरे भारतीयराजदूतेन दिनेशभाटिया इत्यमुना विज्ञापितं यत्—प्रधानमन्त्रिणः यात्रावधौ अद्य चतुर्षु सन्धिपत्रेषु हस्ताक्षरं भविष्यति।

**सोनोवाल-असम:**

पोतपरिवहन-जलमार्गमन्त्री सर्बानन्द- सोनोवालः पूर्वोत्तरक्षेत्रे जलमार्ग-सामुद्रिकक्षेत्रयोः सम्वर्द्धनाय पञ्चसहस्र-कोटि-रूप्यकाणां योजनायाः घोषणां कृतवान्। ह्यः असमस्य गुवाहाटी-नगरे पत्रकारसम्मेलने सः उक्तवान् यत् अस्यां योजनायां पोताश्रयविस्तारः, सहैव सामुद्रिक-उद्योगाय च पञ्चदशसहस्र-युवभ्यः प्रशिक्षणं विधास्यते।

**बिहार-वैष्णव:**

रेलमन्त्रिणा अश्विनी-वैष्णवेन पटना-दिल्लीं, दरभंगा-लखनऊ, मालदा-लखनऊ एवं सहरसा-अमृतसरं समेत्य चतुण्णां नूतन-अमृत-भारतरेलयानानां घोषणा कृता। सीमाञ्चलाय अपि जोगबनी-इरोड-रेलयानस्य घोषणा समभवत्। तेनोदीरितं यत् षट्पञ्चाशदधिक-एकादशशतकोटिरुप्यकाणां त्रिपञ्चाशत्-किलोमिटरमितं भागलपुर-जमालपुर तृतीय-रेलपट्टिकायै शीघ्रमेव सहमतिः सम्प्राप्स्यते।

**वेब-पोर्टल**

आगामी-जनगणनावधौ स्वगणनायाः कृते एकं वेब-पोर्टलतन्त्रं उपलप्स्यते। एतत् पोर्टलतन्त्रं सप्तविंशत्यधिक-द्विसहस्रतमायै जनगणनायै उभयोः चरणयोः कृते उपलब्धं भविष्यति। भारतस्य महापञ्जीयक- जनगणना–आयुक्तेन सोशल-मीडियासन्देशे प्रोक्तं यत् एषा देशस्य प्रथमा डिजिटल–जनगणना भविष्यति। डेटा-सङ्कलनं मोबाइल–ऐप-तन्त्रांशानां माध्यमेन अङ्ग्ल-भाषायाम्, हिन्दी-भाषायाम् क्षेत्रीय–भाषासु च करिष्यते। प्रगणकाः पर्यवेक्षकाश्च डेटा-सङ्ग्रहणाय स्वकीयानां मोबाइल–यन्त्राणां उपयोगं करिष्यन्ति।

**क्रीड़ा**

भारतस्य युकी भांबरी एवं तस्य अमेरिकी सहभागी रॉबर्ट गौलोवे इत्येतौ लंदननगरे विम्बलडन-टेनिस-प्रतिस्पर्धातः बहर्भूतौ।